Substance, palm-leaf. Size, 8 × $1\frac{1}{4}$ inches. Pages, 8. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Complete.

Regarding the ceremonial touching of certain parts of the body, uttering the appropriate letters of the Tripurasundarīmantra while doing so.

Beginning:

अस्य श्रीमहात्रिपुरसुन्दरीमन्त्रस्य दक्षिणामूर्ति ऋषिः मूर्ध्नि, पङ्क्तिश्छन्दः मुखे, श्रीमहात्रिपुरसुन्दरी देवता हृदये; ऐं बीजं नाभौ, सौः शक्तिः पादयोः, क्लीं कीलकं सर्वाङ्गे, इति ऋष्यादिन्यासः ।

End:

श्रीं ललाटे, ह्रीं गले, क्लीं हृदि, ऐं नाभौ, सौः मूलाधारे, ओं ब्रह्मरन्ध्रे, क्लीं मुखे, श्रीं वस्तौ; ५ मूलाधारे, ६ हृदये, ४ ब्रह्मरन्ध्रे; सौः दक्षकरे, ऐं वामकरे, क्लीं दक्षपादे, ह्रीं वामपादे, श्रीं महाहृदये—इति महासौभाग्यन्यासः ॥

सम्पूर्णं हृदि न्यसेत् ॥

No. 6341. त्रिपुरसुन्दरीमालामन्त्रः.

TRIPURASUNDARĪMĀLĀMANTRAḤ.

Pages, 6. Lines, 13 on a page.

Begins on fol. 21*a* of the MS. described under No. 547

Complete.

This Mantra is in praise of Tripurasundarī. It describes her various characteristics under different significant names.

For the beginning, see under No. 6343.

End:

महामहागुप्तायै नमः महामहाभुक्तायै नमः महामहानन्दायै नमः महामहास्पन्दायै नमः महामायायै नमः महामहाश्रीचक्रनगरसम्राज्ञि नमस्ते नमस्ते स्वाहा सौः क्लीं ऐं श्रीं ह्रीं ऐं श्रीराजराजेश्वर्यै नमः ओं तत्सत् ॥

No. **6342.** त्रिपुरसुन्दरीमालामन्त्रः.

TRIPURASUNDARĪMĀLĀMANTRAḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 16*a* of the MS. described under No. 5864.

Complete.

This is associated with an Uccāṭanamantra intended to drive away evil spirits.

Similar to the above otherwise.

Beginning:

त्रिपुरसुन्दर्युच्चाटनमन्त्रः—

ओं नमो भगवति महादेवि जगज्जननि चतुर्भुवनाधीश्वरि राजराजेश्वरि महिषासुरमर्दनि त्रिशूलखङ्गपाशाङ्कुशधरे महारौद्रशक्तिरुद्रस्वरूपिणि ।

End:

चण्डिग्रहलण्डिग्रहमुण्डिग्रहवन्धग्रहविध्वंसिनि हुं फट् स्वाहा ॥

No. **6343.** त्रिपुरसुन्दरीमालामन्त्रः.

TRIPURASUNDARĪMĀLĀMANTRAḤ.

Pages, 6. Lines, 12 on a page.

Begins on fol. 1*b* of the MS. described under No. 547.

Complete.

Slightly different from No. 6341.

Beginning:

अस्य शक्तिशुद्धीशमहात्रिपुरसुन्दरीमालामन्त्रस्य उपस्थेन्द्रियाधिष्ठायि(ता)वरुणादित्य ऋषिः, देवी गायत्री छन्दः,सात्त्विककाकारभट्टारिकापीठ-

स्थितकामेश्वरकामेश्वराङ्कनिलयकामेश्वरकामेश्वरीनिलयनामललितादेवताश्री श्रीभट्टारिका देवता ; खड्गसिद्धौ विनियोगः ।

For the end, see under No. 6341.

No. **6344.** त्रिपुरसुन्दरीमालामन्त्रः.

TRIPURASUNDARĪMĀLĀMANTRAḤ.

Pages, 4. Lines, 5 on a page.

Begins on fol. 57*a* of the MS. described under No. 3691.

Complete.

Same as the above.

No. **6345.** त्रिपुरसुन्दरीमालामन्त्रः.

TRIPURASUNDARĪMĀLĀMANTRAḤ.

Page, 1. Lines, 18 on a page.

Begins on fol. 61*b* of the MS. described under No. 2886.

Complete.

Similar to the above.

Beginning:

अस्य श्रीमहात्रिपुरसुन्दरीमालामन्त्रस्य वरुणादित्यः, देवी गायत्री, महात्रिपुरसुन्दरी परा भट्टारिका, महा—गः

* * * *

ओं ऐं ह्रीं श्रीं नमस्त्रिपुरसुन्दरि हृदयदेवि शिरोदेवि शिखादेवि कवचदेवि नेत्रदेव्यस्त्रदेवि कामेश्वरि भगमालिनि नित्यक्लिन्ने भेरुण्डे वह्निवासिनि ।

End:

श्रीचक्रनगरसम्राज्ञि नमस्ते नमस्ते स्वाहा ।

श्रीं ह्रीं ऐं ओं ।

एषा विद्या महासिद्धिदायिनी स्मृतिमात्रतः ।
वह्निवातभयक्षोभे राजराजस्य विप्लवे ॥

* * * *

आपत्काले नित्यपूजां विस्तरात् कर्तुमक्षमः ।
एकवारं जपेदेनं सर्वपूजाफलं लभेत् ॥

Colophon:

इति मालामन्त्रस्सम्पूर्णः ॥

No. **6346.** त्रिविक्रमगायत्री.
TRIVIKRAMAGĀYATRĪ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 11*b* of the MS. described under No. 5786.

Complete.

This is the Gāyatrī-mantra relating to Viṣṇu in the incarnation of Trivikrama.

Beginning:

ओं त्रिविक्रमाय विद्महे विश्वरूपाय धीमहि । तन्नो विष्णुः प्रचोदयात् ओं । इति प्राणायामः । त्रिविक्रमाय विद्महे हृदयाय नमः ।

* * * *

अस्य श्रीत्रिविक्रमगायत्रीमन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, श्रीत्रिविक्रमो देवता; त्रिविक्रमप्रेरणया त्रिविक्रमप्रीत्यर्थे जपे विनियोगः ।

End:

त्रिविक्रमगायत्रीमन्त्रजपङ्करिष्ये--
त्रिविक्रमाय विद्महे विश्वरूपाय धीमहि ।
तन्नो विष्णुः प्रचोदयात् ॥
इति जपः उपसंहारः पूर्ववत् ॥

No. **6347.** त्रैलोक्यमङ्गलकवचः.
TRAILŌKYAMAṄGALAKAVACAḤ.

Pages, 5. Lines, 5 on a page.

Begins on fol. 22*a* of the MS. described under No. 831.

Complete.

This Mantra is supposed to have the power of securing protection for one in all the three worlds.

Beginning:

पुलस्त्य उवाच—

भगवन् सर्वधर्मज्ञ कवचं यत् प्रकाशितम् ।
त्रैलोक्यमङ्गलं नाम कवचं कथय प्रभो ॥

सनत्कुमार उवाच—

शृणु वक्ष्यामि विप्रेन्द्र कवचं परमाद्भुतम् ।
नारायणेन कथितं कृपया ब्रह्मणे पुरा ॥

* * * *

त्रैलोक्यमङ्गलस्यास्य कवचस्य प्रजापतिः ।
ऋषिश्छन्दो हि गायत्री देवो नारायणस्स्वयम् ॥
धर्मार्थकाममोक्षेषु विनियोगः प्रकीर्तितः ।

* * * *

प्रणवो मे शिरः पातु नमो नारायणाय च ।
फालं पायान्नेत्रयुग्ममष्टार्णो भुवि संस्थितः ॥

End:

त्रैलोक्यमङ्गलं नाम कवचं ब्रह्मरूपिणम् ।
ब्रह्मेशानसुरेभ्यश्च नारायणमुखाच्चयुतम् ॥

* * * *

त्रैलोक्यं क्षोभयत्येव त्रैलोक्ये विजयी भवेत् ॥
इदंकवचमज्ञात्वा यो जपेत् पुरुषोत्तमम् ।
शतलक्षं प्रजप्तोऽपि न मन्त्रस्सिद्धिदायकः ॥

Colophon:

इति सनत्कुमारतन्त्रे त्रैलोक्यमङ्गलं नाम कवचः समाप्तः ॥

No. 6348. त्रैलोक्यमोहनरामकवचः.

TRAILŌKYAMŌHANARĀMAKAVACAḤ.

Pages, 4. Lines, 7 on a page.

Begins on fol. 36*a* of the MS described under No. 757.

Complete.

This is a portion of Brahmayāmala.

This Mantra is supposed to enable one to win the favour of Rāma and thus obtain protection.

Beginning:

पार्वत्युवाच—

भगवन् सर्वदेवेश सर्वदेवनमस्कृत ।
सर्वं मे कथितं देव राममन्त्रं विशेषतः ॥
त्रैलोक्यमोहनं रामकवचं पूर्वसूचितम् ।
कथयस्व महादेव यद्यहं तव वल्लभा ॥

* * * *

अस्य श्रीरामचन्द्रकवचमहामन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, श्रीरामचन्द्रो देवता; ओं बीजं, नमश्शक्तिः, रामायेति कीलकं, श्रीरामचन्द्रप्रसादसिद्ध्यर्थे जपे विनियोगः ।

* * * *

ओं(कारो मे)शिरः पातु तारकं ब्रह्मरूपधृत् ।
अनन्ताग्निस(ज्ञान)हा सेन्दुर्नासामेकाक्षरोऽवतु ॥
ओं रां रामाय नम इति षड्वर्णो भुक्तिमुक्तिदः ।
फालं पायान्नेत्रयुग्मं रामाद्यक्षरसंज्ञिकम् ॥

End:

प्रणवादिनमोन्तोऽयं मालामन्त्र उदीरितः।
राजस्थाने सदा पातु रघुवंशसमुद्भवः ॥

* * * *

सम्यग्ज्ञात्वा तु कवचं मन्त्रस्स्याच्छीघ्रसिद्धिदः ।
तस्मान्मन्त्रं जपेन्नित्यं सर्वसिद्धिफलप्रदम् ॥

Colophon:

इति श्रीब्रह्मयामले पार्वतीश्वरसंवादे श्रीरामस्य त्रैलोक्यमोहनं नाम कवचं संपूर्णम् ॥

No. 6349. त्रैलोक्यमोहनरामकवचः.

TRAILŌKYAMŌHANARĀMAKAVACAḤ.

Pages, 4. Lines, 7 on a page.

Begins on fol. 98*a* of the MS. described under No. 2549.

Complete.

Similar to the above.

See under the previous number for the beginning.

End:

ततस्तु कवचं सम्यक् सर्वकार्याणि साधयेत् ।
मन्त्रसिद्धिर्भवेत्तस्य पुरश्चर्यां विना ततः ॥
(यो भक्त्या चिन्तयन् रामं) कवचं धारयेत् सुधीः ।
गद्यपद्यमयी वाणी (तस्य वक्त्रे प्रवर्तते) ॥

No. 6350. त्रैलोक्यमोहनरामकवचः.

TRAILŌKYAMŌHANARĀMAKAVACAḤ.

Pages, 7. Lines, 5 on a page.

Begins on fol. 12*a* of the MS. described under No. 5263.

Complete.

Same as the above.

No. 6351. त्र्यम्बकमन्त्रः.

TRYAMBAKAMANTRAḤ.

Pages, 5. Lines, 6 on a page.

Begins on fol. 41*a* of the MS. described under No. 5987.

Complete.

This Mantra is addressed to Śiva and is supposed to bestow on one long life and prosperity.

Beginning:

अस्य श्रीत्र्यम्बकस्तोत्रमहामन्त्रस्य मैत्रावरुणपुत्रो वसिष्ठ ऋषिः, अनुष्टुप् छन्दः, मृत्युञ्जयत्र्यम्बकरुद्रो देवता; देवदेव्यौ प्रणवौ बीजशक्ती, अत्र मूलमन्त्रेण करशुद्धिं कृत्वा प्रणवं करतलयोर्विन्यस्य ।

End:

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् । उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् । मम पत्नीपुत्रपरिवारसमेतस्य आयुस्समृद्धि-(ध्य)तां, मृत्युं नाशय स्वाहा । ओं ह्रीं ह्रां जुं सः ओं भूर्भुवस्सुवस्स्वाहा ॥

No. **6352.** त्र्यम्बकमन्त्रः.

TRYAMBAKAMANTRAḤ.

Pages, 4. Lines, 4 on a page.

Begins on fol. 134*a* of the MS. described under No. **29.**

Complete

Similar to the above.

See under the previous number for the beginning.

End:

त्र्य(त्रिय)म्बक महादेव त्राहि मां शरणागतम् ।
जन्ममृत्युजरारोगैः पीडितं कर्मबन्धनैः ॥
तावकस्त्वद्गतप्राणः त्वच्चित्तोऽहं सदाशिव ।
इति विज्ञाप्य देवेशं जपेन्मन्त्रं त्रियम्बकम् ॥
त्र्यम्बकं . . . . . . मामृतात् ॥

No. **6353.** त्र्यम्बकमन्त्रः.

TRYAMBAKAMANTRAḤ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 116*a* of the MS. described under No. 119.

Complete.

Same as the above.

Colophon:

इति त्र्यम्बकमन्त्रः संपूर्णः ॥

No. **6354.** त्र्यम्बकमन्त्रः.

TRYAMBAKAMANTRAḤ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 42*a* of the MS. described under No. 432.

Complete.

Same as the above.

No. **6355.** त्र्यम्बकमन्त्रः.

TRYAMBAKAMANTRAḤ.

Pages, 4. Lines, 6 on a page.

Begins on fol. 60*a* of the MS. described under No. 6032.

Complete.

Same as the above.

No. **6356.** त्र्यम्बकमन्त्रः.

TRYAMBAKAMANTRAḤ.

Pages, 2. Lines, 24 on a page.

Begins on fol. 98*a* of the MS. described under No. 446.

Complete.

Same as the above.

No. **6357.** त्र्यम्बकमन्त्रः.

TRYAMBAKAMANTRAḤ.

Page, 1. Lines, 8 on a page.

Begins on fol. 22*a* of the MS. described under No. 124.

Complete.

Similar to the above.

Beginning:

अस्य श्रीत्र्यम्बकरुद्रमहामन्त्रस्य ब्रह्मा ऋषिः, अनुष्टुप् छन्दः, त्र्यम्बकमहारुद्रो देवता, मम मृत्युञ्जयप्रसाद—गः ।

End:

आदौ—

प्रागादि(षु)चतुर्दिक्षु दिग्बन्धं कारयेत्क्रमात् ।
दुर्गा विनायकश्चैव वागीशः क्षेत्रपालकः ।
एते दिग्बन्धमन्त्रास्स्युरन्ततो नम उच्यते ॥

मूलम्—

त्र्यम्बकं . . . . . . मामृतात् ॥

No. **6358.** त्र्यम्बकमृत्युञ्जयमन्त्रः.

TRYAMBAKAMṚTYUÑJAYAMANTRAḤ.

Pages, 4. Lines, 15 on a page.

Begins on fol. 54*a* of the MS. described under No. 5673.

Complete.

Supposed to aid one in overcoming the bondage of death.

Beginning:

अस्य श्रीत्र्यम्बकमृत्युञ्जयमहामन्त्रस्य मैत्रावरुणपुत्रो वसिष्ठ ऋषिः, अनुष्टुप् छन्दः, श्रीत्र्यम्बकमृत्युञ्जयरुद्रो देवता; देवदेव्यौ प्रणवौ बीजशक्ती, ओं बीजं, क्लीं शक्तिः, मं मृत्युमोचन इति कीलकं, मम चिन्तितमनोरथसिद्धिद्वारा श्रीत्र्यम्बकमृत्युञ्जयरुद्रप्रसादासिद्ध्यर्थे जपे विनियोगः ।

End:

ओं ह्रीं त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ॥

No. 6359. त्र्यम्बकरुद्रकवचः.

TRYAMBAKARUDRAKAVACAḤ.

Pages, 4. Lines, 24 on a page.

Begins on fol. 98*b* of the MS. described under No. 446.

Complete.

A prayer to Śiva beseeching protection.

Beginning:

त्र्यम्बकरुद्रकवचम्—

अस्य श्रीरुद्रकवचस्तोत्रमन्त्रस्य दुर्वासा ऋषिः, अनुष्टुप् छन्दः, श्रीत्र्यम्बकरुद्रो देवता ; ओं बीजं, ह्रीं शक्तिः, क्रीं कीलकं, मम शरीररक्षणार्थं रुद्रकवचस्तोत्रमन्त्रजपं करिष्ये

* * * *

एवं सर्वगतं देवं सर्वदेवमयं शिवम् ।
कवचं संप्रवक्ष्यामि अङ्गप्राणांश्च(णादि) रक्षकम् ॥

* * * *

शिवो मे शिरसं पातु ललाटं नीललोहितः ।
नेत्रे (द्वे) त्र्यम्बकः पातु मुखं पातु महेश्वरः ॥

End:

त्राहि त्राहि त्रिलोकेश त्राहि त्राहि त्रिलोचन ।
त्राहि मां पार्वतीनाथ त्राहि मां भवभञ्जन ॥

* * * *

पुत्रार्थी लभते पुत्रान् धनार्थी लभते धनम् ।
काम्यार्थी लभते कामान् मोक्षार्थी मोक्षमाप्नुयात् ॥

Colophon:

इति श्रीत्र्यम्बकरुद्रकवचं संपूर्णम् ॥

No. 6360. त्वरितापार्वतीमन्त्रः.
TVARITĀPĀRVATĪMANTRAḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 166*b* of the MS. described under No. 537.

Complete.

Addressed to Pārvatī and supposed to be helpful in making the animate and inanimate beings in the three worlds become favourably disposed towards one.

Beginning:

अस्य श्रीत्वरितापार्वतीमन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, त्वरिता पार्वती देवता; ह्रीं बीजं, स्वाहा शक्तिः, क्लीं कीलकं, मम त्रैलोक्य-वश्यसिद्ध्यर्थे जपे विनियोगः।

End:

मूलमन्त्रः—

ह्रीं योगिनि योगिनि योगीश्वरि योगिभयङ्करि सकलस्थावरजङ्गममुख-हृदयं मम वशमाकर्षय आकर्षय स्वाहा ॥

No. 6361. त्वरितामन्त्रः.
TVARITĀMANTRAḤ.

Pages, 2. Lines, 18 on a page.

Begins on fol. 276*a* of the MS. described under No. 5477.

Complete.

Same as the above.

No. 6362. त्वरितामन्त्रः.
TVARITĀMANTRAḤ.

Page, 1. Lines, 18 on a page.

Begins on fol. 45*b* of the MS. described under No. 2886.

Complete.

Similar to the above.

Beginning:

त्वरितायाः सद्योजात (ऋषिः), अतित्रिष्टुप् छन्दः, त्वरिता देवता त्वं बीजं, भं शक्तिः, स्वेच्छाकरणसिद्ध्यर्थे ।

End:

कराय भीमवेषाय हुं फट् च विजयद्वयम् ।
ह्रां स्वं फट् च रिपून् फट् च स्वाहान्तं मन्त्रमुच्यते ॥

अक्षरसहस्रं जपः ।

ठकारमध्ये परिलिख्य मात्रां बाह्येऽष्टपत्रेषु च हुं फडर्णम् ।
संवेष्ट्य पाशाङ्कुशमातृकार्णमाराधयेत् श्यामलवीरभद्रम् ॥

आराधनानन्तरं मातृकावर्णपूर्वकं जपेत् ॥

No. **6363.** त्वरितामन्त्रः.

TVARITĀMANTRAḤ.

Pages, 2. Lines, 10 on a page.

Begins on fol. 89*a* of the MS. described under No. 5566.

Complete.

Addressed to Pārvatī : supposed to enable one to accomplish one's desires.

Beginning:

अस्य श्रीत्वरितामन्त्रस्य ईश्वर ऋषिः, विराट् छन्दः, श्रीत्वरिता पार्वती देवता; ह्रीं बीजं, श्रीं शक्तिः, मम इष्टकाम्यार्थसिद्ध्यर्थे जपे विनियोगः ।

End:

ओं ह्रीं हुं खे च च्छिक्षस्त्रि ह्रूं ह्रीं फट् लक्षजपपुरश्चरणं कुर्यात् । मधुरत्रयाक्तैः बिल्वसमिद्भिर्दशांशहोमः ॥

No. 6364. त्वरितामन्त्रः.

TVARITĀMANTRAḤ.

Page, 1. Lines, 26 on a page.

Begins on fol. 234*b* of the MS. described under No. 581.

Complete.

Same as the above.

No. 6365. दक्षिणकालिकामन्त्रः.

DAKṢIṆAKĀLIKĀMANTRAḤ.

Pages, 2. Lines, 15 on a page.

Begins on fol. 44*b* of the MS. described under No. 5673.

Complete.

This Mantra is intended to propitiate Dakṣiṇakālikā, who is the same as the Pārvatī who is worshipped in the South.

Beginning:

अस्य श्रीदक्षिणकालिकामहामन्त्रस्य महाकाल भैरव ऋषिः, उष्णिक् छन्दः, श्रीदक्षिणकालिका देवता; क्रां बीजं, क्रीं शक्तिः, ह्रैं(क्रैं)कीलकं, मम श्रीदक्षिणकालिकाप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End:

क्रीं क्रीं क्रीं ह्रीं ह्रीं ह्रीं दक्षिणकालिके ह्रीं ३ क्रीं ३ हुं फट् स्वाहा ॥

No. 6366. दक्षिणकालीकवचः.

DAKṢIṆAKĀLĪKAVACAḤ.

Pages, 2. Lines, 19 on a page.

Begins on fol. 48*b* of the MS. described under No. 2886.

Complete.

Taken from Rudrayāmala.

Addressed to Dakṣiṇakālikā with a view to obtain help and protection.

Beginning:

श्रीशिव उवाच—

श्रृणु देवि महाविद्यां सर्वविद्योत्तमोत्तमाम् ।
सर्वेश्वरीं महाविद्यां सर्वदेवप्रपूजिताम् ॥

* * * *

अस्य श्रीदक्षिणकाळीत्रैलोक्यमोहनकवचस्य भैरव ऋषिः, उष्णिक् छन्दः, श्मशानकालिका देवता, चतुर्वर्गसिद्धये जपे विनियोगः ।

ललाटे पातु वक्रा मे हरेणाराधिता पुरा ।
नेत्रयुग्मं सदा पातु क्रां क्रीं श्रीं विष्णुसेविता ॥

End:

इदं कवचमज्ञात्वा यो जपेत्कालिकामनुम् ।
ध्यानेन कोटिजाप्येन तस्य विद्या न सिध्यति ॥

* * * *

यदिदं कवचं दिव्यं प्रकाशात्सिवहा(द्धिदं) भवेत् ।
भक्ताय ज्येष्ठपुत्राय साधकाय प्रदापयेत् ॥

Colophon:

इति श्रीरुद्रयामळे हरपार्वतीसंवादे श्रीदक्षिणकाळिकायाः त्रैलोक्यमोहनकवचं समाप्तम् ॥

No. **6367.** दक्षिणामूर्तिकवचः.

DAKṢIṆĀMŪRTIKAVACAḤ.

Pages, 4. Lines, 5 on a page.

Begins on fol. 173*a* of the MS. described under No. 537.

Complete.

This Mantra is addressed to Śiva as Dakṣiṇāmūrti, and is supposed to be capable of bestowing on the supplicant whatever he may desire.

Beginning:

ब्रह्मा उवाच—

श्रृण्वन्तु ऋषयस्सर्वे गुह्याद्गुह्यतमं महत् ।
दक्षिणामूर्तिदेवस्य कवचं च वदाम्यहम् ॥
नारदेन कृतं पूर्वं श्रीरामस्य महात्मनः ।
रहस्यं कथितं तस्य अगस्त्येन महात्मना ॥

* * * *

अस्य श्रीदक्षिणामूर्तिकवचस्तोत्रमहामन्त्रस्य नारदभगवान् ऋषिः, अनुष्टुप् छन्दः, श्रीदक्षिणामूर्तिर्भगवान् रुद्रो देवता; ओं बीजं, स्वाहा शक्तिः, नमः कीलकं, श्रीदक्षिणामूर्तिप्रसादसिद्ध्यर्थे जपे विनियोगः ।

* * * *

प्राच्यां रक्षतु देवेशः प्रतीच्यामभयप्रदः ।
दक्षिणस्यां जगन्नाथ उत्तरस्यां सदाशिवः ॥

End:

तस्मात्किं बहुनोक्तेन कवचं धारयेद्यदि ।
सर्वान् कामानवाप्नोतीत्यन्ते मुक्तिर्न संशयः ॥
ईश्वरो गुरुरात्मेति मूर्तिभेदाद्विभागिने ।
व्योमवद्व्याप्तदेहाय दक्षिणामूर्तये नमः ॥

Colophon:

इति श्रीमन्त्ररत्नाकरे शिवरहस्ये दक्षिणामूर्तिकवचं नामाष्टमः पटलः समाप्तः ॥

No. **6368.** दक्षिणामूर्तिकवचः.

DAKṢIṆĀMŪRTIKAVACAḤ.

Pages, 16. Lines, 6 on a page.

Begins on fol. 7*a* of the MS. described under No. 408

Complete.

Similar to the above.

Beginning:

अस्य श्रीदक्षिणामूर्तिकवचस्तोत्रमहामन्त्रस्य ब्रह्मा ऋषिः, अनुष्टुप् छन्दः, ऋग्यजुस्सामाथर्वाणि बीजानि, स्वाहा शक्तिः, मम सकलाभीष्टसिद्ध्यर्थे जपे विनियोगः ।

* * * *

शिरो मे दक्षिणामूर्तिरव्यात्फालं महेश्वरः ।
दृशौ पातु महादेवः श्रवसी चन्द्रशेखरः ॥

End:

इतीदं कवचं देवि परमानन्ददायकम् ।
आयुरारोग्यसौभाग्यसुज्ञानैश्वर्यवर्धनम् ॥

Colophon:

इति श्रीउमामहेश्वरसंवादे दक्षिणामूर्तिकवचं सम्पूर्णम् ॥

No. **6369.** दक्षिणामूर्तिकवचः.

DAKṢIṆĀMŪRTIKAVACAḤ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 186*b* of the MS. described under No. 119.

Complete.

Similar to the above.

Supposed to enable one to become an inspired poet.

Beginning:

पार्वत्युवाच—

देवदेवं जगन्नाथं विश्वमूर्तिं परात् परम् ।
कवचं दक्षिणामूर्तेः कृपया वद मे प्रभो ।

ईश्वर उवाच—

वक्ष्येऽहं देवि देवेशं दक्षिणामूर्तिमव्ययम् ।
अणिमादिमहासिद्धिविधानचतुरं शुभम् ॥

ऋषिर्ब्रह्मा समुद्दिष्टः छन्दोऽनुष्टुबुदाहृतः ।
देवता दक्षिणामूर्तिः परमात्मा सदाशिवः ॥

* * * *

शिरो मे दक्षिणामूर्तिर्ललाटं तु महेश्वरः ।
दृशौ पातु महादेवः श्रवणे चन्द्रशेखरः ॥

End:

जानू त्रियम्बकः पातु जङ्घे पातु पिनाकधृत् ।
अपस्मारहरः पादौ पातु सर्वाङ्गमीश्वरः ॥
यदिदं कवचं देवि परमानन्दकारकम् ।
प्रातःकाले शुचिर्भूत्वा त्रिवारं सर्वदा जपेत् ॥

* * * *

गद्यपद्यन्तथा काव्यनाटके स्वयमेव हि ।
निर्गच्छन्ति मुखाम्भोजात्तस्य वक्त्रान्न संशयः ॥

Colophon:

दक्षिणामूर्तिकवचं संपूर्णम् ॥

No. **6370.** दक्षिणामूर्तिकवचः.

DAKṢIṆĀMŪRTIKAVACAḤ.

Pages, 5. Lines, 5 on a page.

Begins on fol. 129*a* of the MS. described under No. 29.

Complete.

Same as the above.

In the end, the following additional stanza is found :—

आधयो व्याधयश्चैव न भवन्ति कदाचन ।
स विनाशयते नित्यं कालमृत्युमपि ध्रुवम् ॥

No. 6371. दक्षिणामूर्तिकवचः.
DAKṢIṆĀMŪRTIKAVACAḤ.

Pages, 6. Lines, 16 on a page.

Begins on fol. 85*a* of the MS. described under No. 5568.

Complete.

Similar to the above.

The proper repetition of this Mantra is supposed to bestow on one everything which one desires even including salvation.

Beginning:

शृण्वन्तु ऋषयस्सर्वे गुह्याद्गुह्यतरं महत् ।
दक्षिणामूर्तिदेवस्य कवचं जपतामहम् ॥
नारदेन कृतं सम्यक् श्रीरामस्य महात्मनः ।
रहस्ये कथितं सम्यगगस्त्येन महात्मना ॥

* * * *

प्राच्यां रक्षतु गौरीशः प्रतीच्यामभयप्रदः ।
दक्षिणस्यां जगन्नाथ उत्तरस्यां सदाशिवः ॥

End:

तस्मात्किमिह(म्बहु)नोक्तेन कवचं धारयेद्यदि ।
सर्वान् कामानवाप्नोति अन्ते मुक्तिर्न संशयः ॥

Colophon:

दक्षिणामूर्तिकवचं सम्पूर्णम् ॥

No. 6372. दक्षिणामूर्तिकवचः.
DAKṢIṆĀMŪRTIKAVACAḤ.

Pages, 4. Lines, 16 on a page.

Begins on fol. 75*b* of the MS. described under No. 5568.

Complete.

Similar to the above.

This Mantra is supposed to enable one to become a poet and also to accomplish one's desires.

Beginning:

श्रीपार्वत्युवाच—

देवदेव जगन्नाथ विश्वमूर्ते परात्पर ।
नमस्तेऽस्तु त्रयीनाथ परमानन्ददायक ॥
कवचं दक्षिणामूर्तेः कृपया वद मे प्रभो ।

*   *   *   *

अस्य श्रीदक्षिणामूर्तिकवचस्तोत्रमहामन्त्रस्य ब्रह्मा ऋषिः, अनुष्टुप् छन्दः, श्रीदक्षिणामूर्तिर्देवता; आं बीजं, स्वाहा शक्तिः, नमः कीलकं, मम सर्वाभीष्टसिद्ध्यर्थे जपे विनियोगः ।

शिरो मे दक्षिणामूर्तिरव्यात्फालं महेश्वरः ।
दृशौ पातु महादेवः श्रवणे चन्द्रशेखरः ॥

End:

नाटकादिप्रबन्धस्य कर्तृत्वं तेन लभ्यते ।
दक्षिणामूर्तिसायुज्यं तस्मिन्नेव न संशयः ॥

Colophon:

इति रुद्रयामले उमामहेश्वरसंवादे दक्षिणामूर्तिकवचं सम्पूर्णम् ॥

No. **6373.** दक्षिणामूर्तित्रैलोक्यविजयकवचः.

DAKṢIṆĀMŪRTITRAILŌKYAVIJAYAKAVACAḤ.

Pages, 6. Lines, 16 on a page.

Begins on fol. 78*a* of the MS. described under No. 5568.

Complete.

This Mantra is supposed to confer on one success in all the three worlds.

Beginning:

परा शक्तिरुवाच—

देवेश श्रोतुमिच्छामि रहस्यातिरहस्यकम् ।
यन्न कस्यापि सम्प्रोक्तं गोपितं वर्णरूपकम् ॥

ईश्वर उवाच—

* * * *

लोक्यजयदं नाम कवचं मन्त्रविग्रहम् ।
सर्वमन्त्रमयं दिव्यं शैवषट्कसमन्वितम् ॥
कवचं शुभदं भद्रे दक्षिणामूर्तिशर्मणः ।

* * * *

ब्रह्मरन्ध्रे भृतौम(भ्रुवोर्म)ध्ये ललाटेऽव्यात्तु पञ्चमः ।
अक्षियुग्मन्तथा पातु प्रणवोक्तः प्रपञ्चमः ॥

End:

गोपनीयं गोपनीयं गोपनीयं प्रयत्नतः ।
गोपनीयं प्रयत्नेन किमन्यच्छ्रोतुमिच्छसि ॥

Colophon:

इति श्रीचिदम्बरनटनतन्त्रे दक्षिणामूर्तिकवचं सम्पूर्णम् ॥

No. 6374. दक्षिणामूर्तिद्वादशाक्षरीमन्त्रः.

DAKṢIṆĀMŪRTIDVĀDAŚĀKṢARĪMANTRAḤ

Pages, 2. Lines, 16 on a page.

Begins on fol. 81*b* of the MS. described under No. 5568.

Complete.

This Mantra is addressed to Śiva conceived as Dakṣiṇāmūrti. It consists of 12 syllables.

Beginning:

अस्य श्रीदक्षिणामूर्तिद्वादशाक्षरीमहामन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, श्रीदक्षिणामूर्तीश्वरो देवता ; आं बीजं, ह्रां शक्तिः, सौः कीलकं, विनियोगः ॥

End:

मनुः—

ओं सौः ह्रां साम्बशिवाय तुभ्यं स्वाहा ॥

No. 6375. दक्षिणामूर्तिनवाक्षरीमन्त्रः.
DAKṢIṆĀMŪRTINAVĀKṢARĪMANTRAḤ.

Pages, 2. Lines, 16 on a page.

Begins on fol. 81*a* of the MS. described under No. 5568.

Complete.

This Mantra is also addressed to Śivaas Dakṣiṇāmūrti. It consists of 9 syllables.

Beginning:

अस्य श्रीदक्षिणामूर्तिनवाक्षरीमहामन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, श्रीदक्षिणामूर्तीश्वरो देवता, आं बीजं, अः शक्तिः, नम इति कीलकं, जपे विनियोगः ।

End:

ओं अः नमः शिवाय अः ओं ॥

No. 6376. दक्षिणामूर्तिपञ्जरम्.
DAKṢIṆĀMŪRTIPAÑJARAM.

Pages, 12. Lines, 6 on a page.

Begins on fol. 26*a* of the MS. described under No. 831.

Complete.

This manuscript was transcribed by Śivaṭeṅka Vīrēśaliṅga for Paṇḍitārādhya Sarvēśaliṅga, and the transcription was completed on Monday the 5th Bahula of Śrāvaṇa in the year Dhātu.

The good results which this Mantra is supposed to bring about are described in the first two stanzas and in the last stanza.

Beginning:

नष्टराज्यस्य सिद्धिश्च तथा निगलमोचनम् ।
ऋणदारिद्र्यनाशश्च तनयप्राप्तिरेव च ॥
अश्रुतस्य प्रबन्धस्य सम्यग्व्याख्यानपाटवम् ।
प्रतिभोन्मेषणं चैव प्रबन्धरचना तथा ॥

* * * *

ऋषिस्तस्य शुकः प्रोक्तः छन्दोऽनुष्टुबुदाहृतः ।
देवता दक्षिणामूर्तिः प्रणवो बीजमिष्यते ॥

* * * *

शिरो मे दक्षिणामूर्तिः पातु पाशविमोचनः ।
फालं पातु महादेवः पातु मे विश्वदृग्दृशौ ॥

* * * *

दारान् पातु विरूपाक्षः पुत्रान् पातु जटाधरः ।
पशून् पशुपतिः पातु भ्रातॄन् भूतेश्वरो मम ॥

इतीदं पञ्जरं यस्तु पठेन्नित्यं समाहितः ।
गद्यपद्यात्मिका तस्य वाणी निस्सरति ध्रुवम् ॥

End:

तस्मात् सर्वप्रयत्नेन क्षेमार्थो सर्वदा पुमान् ।
इदमावर्तयेन्नित्यं दक्षिणामूर्तिपञ्जरम् ॥

सालोक्यमपि सामीप्यं सारूप्यं च समाप्य च ।
प्रसादात्तस्य देवस्य सायुज्यं चाधिगच्छति ॥

Colophon:

इति श्रीब्रह्माण्डपुराणे गुहनारदसंवादे दक्षिणामूर्तिपञ्जरं नामाष्टमोऽध्यायस्समाप्तः ॥

No. **6377.** दक्षिणामूर्तिपञ्जरम्.

DAKṢIṆĀMŪRTIPAÑJARAM.

Pages, 9. Lines, 16 on a page.

Begins on fol. 90*b* of the MS. described under No. 5568.

Complete as found in the Mārkaṇḍēya-purāṇa.

This Mantra is supposed to enable one to accomplish one's desires and to protect one's self from all dangers.

Beginning:

प्रणम्य साम्बमीशानं शिरसा वैशि(णि)को मुनिः ।
विनयावनतो भूत्वा पप्रच्छ स्कन्दमादरात् ॥

* * * *

अस्य श्रीदक्षिणामूर्तिपञ्जरमहामन्त्रस्य शुक ऋषिः, अनुष्टुप् छन्दः, ओं बीजं, विद्या शक्तिः, शुक्लवर्णं कीलकं, मम सर्वाभीष्टसिद्ध्यर्थे जपे विनियोगः ।

* * * *

ध्यायेद्देवं महादेवं प्रजपेत्पञ्जरं शुभम् ॥
शिरो मे दक्षिजामूर्तिः पातु पाशविमोचनः ।
फालं पातु महादेवः पातु मे विश्वदृग्दृशौ ॥

End:

सालोक्यमपि सारूप्यं सायुज्यं(मोप्य) समवाप्य च ।
प्रसादात्तस्य देवस्य सायुज्यं चाधिगच्छति ॥

Colophon:

इति मार्कण्डेयपुराणे गुहनारदसंवादे दक्षिणामूर्तिपञ्जरं नामाष्टादशोऽध्यायः ॥

No. **6378.** दक्षिणामूर्तिमन्त्रः.

DAKṢIṆĀMŪRTIMANTRAḤ.

Page, 1. Lines, 10 on a page.

Begins on fol. 92*a* of the MS. described under No. 5566.

Complete.

This Mantra is also addressed to Śiva conceived as Dakṣiṇāmūrti, and is supposed to enable one to become a wise and learned person.

Beginning:

अस्य श्रीदक्षिणामूर्तिमन्त्रस्य शुक ऋषिः, अनुष्टुप् छन्दः, श्रीदक्षिणामूर्तिर्भगवान् रुद्रो देवता; ओं बीजं, ह्रीं शक्तिः, मम वाग्ज्ञानसिद्ध्यर्थे जपे विनियोगः ।

End:

मन्त्रः—ओं ह्रीं ॥

दक्षिणामूर्तये तुभ्यं वटमूलनिवासिने ।
ध्यानैकनिरताङ्गाय नमो रुद्राय शम्भवे ॥

No. 6379. दक्षिणामूर्तिमन्त्रः.
DAKṢIṆĀMŪRTIMANTRAḤ.

Pages, 2. Lines, 28 on a page.

Begins on fol. 239*a* of the MS. described under No. 581.

Complete.

Same as the above.

No. 6380. दक्षिणामूर्तिमालामन्त्रः.
DAKṢIṆĀMŪRTIMĀLĀMANTRAḤ.

Pages, 2. Lines, 16 on a page.

Begins on fol. 99*a* of the MS. described under No. 5568.

Complete.

This Mantra is intended to counteract the evil effects caused by the Mantras used against one by one's enemies.

Beginning:

ओं नमो भगवते दक्षिणामूर्तये ब्रह्मरुद्रावतारेण पार्वतीमनोहरप्रियाय नीलकण्ठाय महामणिमकुटमाणिक्यभूषणाय वज्रनखवज्रकूप(केश)वज्राक्षरावताराय ।

End:

परमन्त्रपरयन्त्रपरतन्त्रपरप्रयोगपरमारणपरस्तम्भनादि मम बलं वनं कुरु कुरु हर हर त्रिशूलधारिणे हुं फट् स्वाहा ॥

No. **6381.** दक्षिणामूर्तिमालामन्त्रः.

DAKṢIṆĀMŪRTIMĀLĀMANTRAḤ.

Pages, 2. Lines, 16 on a page.

Begins on fol. 98*b* of the MS. described under No. 5568.

Complete.

Similar to the above.

This Mautra is intended to enable one to destroy one's enemies and to cure epilepsy and other such diseases.

Beginning:

ओं नमो भगवते दक्षिणामूर्तये महाप्रलयकालरुद्राय सत्कुलसर्पभूषणाय मुसलमुद्गरकटाक्षसंहरणाय जटाभरणभूषिताय गङ्गाधराय ।

End:

आत्मतन्त्रप्रयोगान् संहारय संहारय शूलेन दह दह पाशेन बन्ध बन्ध सकलापस्मारान् नाशय नाशय दक्षिणामूर्तये हुं फट् स्वाहा ॥

No. **6382.** दक्षिणामूर्तिमालामन्त्रः.

DAKṢIṆĀMŪRTIMĀLĀMANTRAḤ.

Page, 1. Lines, 16 on a page.

Begins on fol. 99*a* of the MS. described under No. 5568.

Complete.

This Mantra is supposed to have the power to destroy all unseen evil agencies and to protect one from all dangers.

Beginning:

ओन्नमो भगवते वीरासनस्थिताय ज्ञानमुद्रापराय वटमूलवासिने सर्वभूताधिपतये कपर्दिने महादेवाय अभिनवगोक्षीरधवळाय नागयज्ञोपवीताय नीलग्रीवाय ।

End :

भूतप्रेतपिशाचब्रह्मराक्षसघोरापस्मारान् सर्वग्रहान् दह दह मां त्रा-(य)स्व हुं फट् स्वाहा ॥

No. **6383.** दक्षिणामूर्तिमालामन्त्रः.

DAKṢIṆĀMŪRTIMĀLĀMANTRAḤ.

Pages, 4. Lines, 16 on a page.

Begins on fol. 97*a* of the MS. described under No. 5568.

Complete.

This Mantra is also in praise of Śiva conceived as Dakṣiṇāmūrti and is supposed to be capable of curing certain diseases and of sharpening the intellect.

Beginning :

अस्य श्रीदक्षिणामूर्तिमालामन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, श्रीदक्षिणामूर्तिर्देवता; ह्रां बीजं, मेधा शक्तिः, श्रीं कीलकं, श्रीदक्षिणा-मूर्तिप्रसादसिद्ध्यर्थे जपे विनियोगः ।

ओन्नमो भगवते दक्षिणामूर्तये स्मरणमात्रेण सन्तुष्टाय महाभय-निवारणाय.

End :

जाड्यं दह दह मेधां प्रकाशय प्रकाशय ऐं ऐं क्लीं क्लीं श्रीं श्रीं-फट् फट् सौः सौः फट् स्वाहा ॥

No. **6384.** दक्षिणामूर्त्यष्टादशाक्षरीमन्त्रः.

DAKṢIṆĀMŪRTYAṢṬĀDAŚĀKṢARĪMANTRAḤ.

Page, 1. Lines, 16 on a page.

Begins on fol. 81*b* of the MS. described under No. 5568.

Complete.

This Mantra is supposed to be able to bestow wisdom on one.

It consists of 18 syllables.

Beginning:

अस्य श्रीदक्षिणामूर्त्यष्टादशाक्षरीमहामन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, श्रीदक्षिणामूर्तीश्वरो देवता; ओं बीजं, ह्रीं शक्तिः, ऐं कीलकं, जपे विनियोगः ॥

End:

मनुः—ओं ब्लूं नमः ह्रीं ऐं दक्षिणामूर्तये ज्ञानं देहि स्वाहा ॥

No. **6385.** दक्षिणामूर्त्यानुष्टुभमहामन्त्रः.

DAKṢIṆĀMŪRTYĀNUṢṬUBHAMAHĀMANTRAḤ.

Page, 1. Lines, 16 on a page.

Begins on fol. 82*a* of the MS. described under No. 5568.

Complete.

This Mantra consists of 32 syllables.

Similar to the above.

Beginning:

अस्य श्रींदक्षिणामूर्त्यानुष्टुभमहामन्त्रस्य विष्णु ऋषिः, अनुष्टुप् छन्दः, श्रीदक्षिणामूर्तीश्वरो देवता; आं बीजं, स्वाहा शक्तिः, नम इति कीलकं, जपे विनियोगः ।

End:

ओं नमो भगवते तुभ्यं वटमूलनिवासिने ।
वागीशाय मम ज्ञानदायिने ह्रीं स्वाहा ॥

No. **6386.** दत्तात्रेयकवचः.

DATTĀTRĒYAKAVACAḤ.

Pages, 2. Lines, 9 on a page.

Begins on fol. 16*b* of the MS. described under No. 5868.

Complete as found in the Brahmāṇḍapurāṇa.

Addressed to Dattātrēya for help and protection.

Dattātrēya is the son of Atri and Anasūyā, and is considered to be an incarnation of Viṣṇu.

Beginning:

अस्य श्रीदत्तात्रेयकवचमहामन्त्रस्य नारायण ऋषिः, अनुष्टुप् छन्दः, दत्तात्रेयो देवता; वां बीजं, ह्रीं शक्तिः, मां कीलकं, मम दत्ता . . . . योगः ।

* * * *

आत्रेयो मे शिरः पातु फालं मे मौनिशेखरः ।
योगीश्वरो दृशौ पातु हृदयं राजयोगिनः ॥

End:

खेचरत्वं सदा नृणां सर्वकाम्यार्थसाधकम् ।
शिखायां धारयेन्नित्यं फलमेति न संशयः ॥

Colophon:

इति ब्रह्माण्डपुराणे नरनारायणसंवादे उत्तरखण्डे दत्तात्रेयकवचं संपूर्णम् ॥

No. 6387. दत्तात्रेयकवचः.

DATTĀTRĒYAKAVACAḤ.

Substance, palm-leaf. Size, $11\frac{1}{3} \times 1\frac{1}{2}$ inches. Pages, 4. Lines, 4 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 17*a*. The other works herein are Bhūtōccāṭanahanumanmantra 1*a*, Dattātrēyāṣṭōttaraśatanāmastōtra 7*a*, Vīranṛsiṁhamantra 9*a*, Dattātrēyāṣṭākṣarimantra 16*a*, Dattātrēyamālāmantra 19*a*, Nṛsiṁhakarāvalambanastōtra 20*b*.

Complete as found in the Uḍḍāmarēśvaratantra.

Similar to the above.

Beginning:

दत्तात्रेयंसु(रेन्द्राद्यम)रमुनिगणैस्सेवितं विष्णुरूपं
चन्द्राक्षंचा(र्काक्षा)क्षमालाजिनजडधरं(धरजटिलं) पित्त(पीत)वर्णं शुभाङ्गम् ।
नानायोगाधिकारं सकलऋषियुतं पावनं मौनिराजं
ध्यायेदेवं(ध्येयं देवैः) नराणामखिलशुभकरं देवदेवं नमामि ॥

आत्रेयो मे शिरः पातु फालं मे मौनिशेखरः ।
योगीश्वरो दृशौ पातु अलङ्किकप्रियसुती(नसूयासुतश्श्रुती) ॥

End:

दत्तात्रेयं महाकालि कवचं पठते सदा ॥
आयुष्यं योगवृद्धिं च ऐश्वर्यमतुलं तथा ।
पुत्रपौत्राभिवृद्धिं च वाक्सिद्धिं दाय(राज)योगिनः(ताम्) ॥

Colophon:

इति श्रीउड्डामरेश्वरीतन्त्रे दत्तात्रेयकवचं सम्पूर्णम् ॥

No. **6388.** दत्तात्रेयगायत्री.

DATTĀTRĒYAGĀYATRĪ.

Pages, 2. Lines, 9 on a page.

Begins on fol. 16*a* of the MS. described under No. 5868.

Complete.

This is a Gāyatrīmantra in praise of Dattātrēya, and is supposed to enable one to win his favour.

Beginning:

अस्य श्रीदत्तात्रेयगायत्र्याश्शबर ऋषिः, गायत्री छन्दः, दत्तात्रेयो देवता; द्रां बीजं, ह्रीं शक्तिः, क्रों कीलकं, मम दत्तात्रेयप्रसाद-सिद्ध्यर्थे जपे विनियोगः ।

End:

ध्यानम्—

रविमण्डलमध्यस्थं रक्तं रक्ताब्जसंस्थितम् ।
योगारूढं ज्ञानघनं दत्तात्रेयमहं भजे ॥

ओं दत्तात्रेयाय विद्महे योगीश्वराय धीमहि । तन्नो दत्तः प्रचोद-यात् ॥

इति यथाशक्ति गायत्रीं जपेत् ॥

No. 6389. दत्तात्रेयदिग्बन्धनम्.

DATTĀTRĒYADIGBANDHANAM.

Page, 1. Lines, 9 on a page.

Begins on fol. 16*a* of the MS. described under No. 5868.

Complete.

This Mantra is addressed to Dattātrēya, and is intended to safeguard the various quarters so as to prevent all dangers that may possibly come therefrom.

Beginning:

ओं आं ह्रीं क्रों क्ष्म्रां क्ष्म्रौं मत्सो(त्स्ये)न्द्राय पूर्वदिशं दत्तात्रेयास्त्राय ठ ठ ठ ठ स्तम्भय स्तम्भय, हं द्रां दत्तात्रेयाय कबलेन्द्राय आग्नेयदिशं दत्तात्रेयास्त्राय ठ ठ स्तम्भय स्तम्भय, हरि निर्विष निर्विष गोरक्षणाय याम्यां दिशं दत्तात्रेयास्त्राय ठ ठ स्तम्भय स्तम्भय ।

End:

अरुणगेयाय ईशानदिशं दत्तात्रेयास्त्राय ठ ठ स्तम्भय स्तम्भय, ऐं क्लीं सौः आदिनाथाय ऊर्ध्वदिशं दत्तात्रेयास्त्राय ठ ठ स्तम्भय स्तम्भय, ह्रीं श्रीं हुं फट् कार्तवीर्यार्जुनाय नागदिशं दत्तात्रेयास्त्राय ठ ठ स्तम्भय स्तम्भय स्वाहा ॥

No. 6390. दत्तात्रेयद्वादशाक्षरमन्त्रराजमन्त्रः.

DATTĀTRĒYADVĀDAŚĀKṢARAMANTRARĀJA-MANTRAḤ.

Pages, 2. Lines, 15 on a page.

Begins on fol. 45*b* of the MS. described under No. 5673.

Complete.

This Mantra is intended to please Dattātrēya.

It consists of 12 syllables.

Beginning:

(दत्तात्रेय)द्वादशाक्षरमन्त्रराजमन्त्रस्य शबररूपी शङ्कर ऋषिः, जगती छन्दः, श्रीदत्तात्रेयपरमात्मा देवता; द्रां बीजं, नमः शक्तिः, दत्तात्रेयेति कीलकं, विनियोगः ।

End:

मनुः—

ओं आं ह्रीं क्रों एहि दत्तात्रेय स्वाहा ॥

No. **6391.** दत्तात्रेयनवाक्षरमन्त्रः.

DATTĀTRĒYANAVĀKṢARAMANTRAḤ.

Page, 1. Lines, 6 on a page.

Begins on fol. 15*b* of the MS. described under No 5786.

Complete.

This Mantra consists of 9 syllables.

Similar to the above.

Beginning:

अस्य श्रीदत्तात्रेय(नवाक्षर)मन्त्रस्य ब्रह्मा ऋषिः, बृहती छन्दः, दत्तात्रेयो देवता, दत्तात्रेयप्रेरणया दत्तात्रेयप्रीत्यर्थे नवाक्षरदत्तात्रेयमन्त्रजपे विनियोगः ।

End:

नवाक्षरदत्तात्रेयमहामन्त्रजपं करिष्ये—

ओं दं दत्तात्रेयाय नमः । इति जपः । उपसंहारः पूर्ववत् ॥

No. **6392.** दत्तात्रेयमन्त्रः.

DATTĀTRĒYAMANTRAḤ.

Pages, 6. Lines, 5 on a page.

Begins on fol. 83*a* of the MS. described under No. 1872.

Complete.

This is also addressed to Dattātrēya, and is intended to increase one's prosperity and to gain for one the good will of others.

Beginning:

अस्य श्रीदत्तात्रेयमन्त्रस्य श्रीभगवान् ऋषिः, मम सकलसंपद्धनैश्वर्यवशीकरणार्थे जपे विनियोगः ; ओं नमो भगवते दत्तात्रेयाय नमः—ह्रां अङ्गुष्ठाभ्यां नम ; ओं नमो भगवते दत्तात्रेयाय नमः—ह्रीं तर्जनीभ्यां नमः ; ओं नमो भगवते दत्तात्रेयाय नमः—ह्रूं मध्यमाभ्यां नमः ; ओं नमो भगवते ।

* * * *

मूलमन्त्रः—

ओं ह्रीं कीलकं श्रीं ओं नमो भगवते दत्तात्रेयाय कपिलपिङ्गलजटाधराय.

End:

गङ्गास्नानविशेषपुण्यफलदं शीतं सुसाध्वन्वितं
प्रेङ्खत्संस्कृतगद्यपद्यलहरीधारालधाराधरम् ।
नानाशास्त्रपुराणपारगमिदं श्रीकृष्णभक्तप्रियं
दत्तात्रेयपदारविन्दयुगलं ध्याये(त्) जगत्पावनम् ॥

No. **6393.** दत्तात्रेयमन्त्रः.

DATTĀTRĒYAMANTRAḤ.

Substance, palm-leaf. Size, $4\frac{1}{2} \times 1$ inches. Pages, 4. Lines, 4 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 3*a*. The other works herein are Hanumanmantra 1*a*, Sudarśanakavaca 5*a*, Sūryakavaca 8*a*, Dattātrēyāṣṭōttarastōtra 12*a*, Vīrabhadrabaḍabānalamālāmantra 17*a*, Hanumatkavaca 19*a*.

Complete.

This Mantra which is also addressed to Dattātrēya is supposed to enable one to accomplish one's desires.

Beginning:

अस्य श्रीदत्तात्रेयमहामन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, दत्तात्रेयो देवता ; आं बीजं, क्रों शक्तिः, दत्तात्रेयेति कीलकं, मम इष्टार्थे जपे विनियोगः ।

End:

मन्त्रः—

ओं ह्रीं क्रों एहि दत्तात्रेय स्वाहा ॥

No. 6394. दत्तात्रेयमन्त्रः.

DATTĀTRĒYAMANTRAḤ.

Page, 1. Lines, 6 on a page.

Begins on fol. 15*b* of the MS. described under No. 5786.

Complete.

Similar to the above.

Beginning and **End:**

गुरुनमस्कारः ॥

ओं दं दत्तात्रेयाय नमः । इति प्राणायामः 12. पूर्णज्ञानेत्यादिन्यासः ।

No. 6395. दत्तात्रेयमन्त्रः.

DATTĀTRĒYAMANTRAḤ.

Page, 1. Lines, 19 on a page.

Begins on fol. 9*a* of the MS. described under No. 2886 .

Complete.

Similar to the above.

Beginning:

आदौ प्रणवमुच्चार्य श्रीबीजं तदनन्त म् ।

मायाबीजं ततः पश्चात्कामबीजं ततः परम् ॥

*　　*　　*　　*

द्रां दत्तात्रेयाय नमः—अष्टाक्षरम् ।

End:

उत्ताडिते करतलेऽप्यपसव्यसव्ये सोपानपर्वसदृशे उपरि स्वनाळे ।
प्रस्तार्य चर्म भसिताङ्गराग मत्रिसुतं रक्तकिरीटजटाकलापम्(?) ॥

No. **6396**. दत्तात्रेयमालामन्त्रः.

DATTĀTRĒYAMĀLĀMANTRAḤ.

Page, 1. Lines, 19 on a page.

Begins on fol. 9*a* of the MS. described under No. 2886.

Complete.

This Mantra is supposed to have the power to protect one from all dangers and to destroy one's enemies.

Beginning:

ओं नमो भगवते दत्तात्रेयाय स्मरणमात्रसन्तुष्टाय महाभयानिवारणाय महाज्ञानप्रदाय चिदानन्दात्मने बालोन्मत्तपिशाचवेषाय महायोगिने अवधूताय अनसूयानन्दवर्धनाय ।

End:

आकर्षय आकर्षय विद्वेषय विद्वेषय उच्चाटय उच्चाटय स्तम्भय स्तम्भय खे खे मारय मारय सम्पन्नय सम्पन्नय स्वाहा । मां पालय पालय दुष्टग्रहनिवारणाय विद्रावय विद्रावय पोषय पोषय सर्वमन्त्रस्वरूपाय सर्वपल्लवस्वरूपाय ओं नमो महासिद्धाय स्वाहा—इत्युपनिषत् ॥

No. **6397**. दत्तात्रेयमालामन्त्रः.

DATTĀTRĒYAMĀLĀMANTRAḤ.

Pages, 2. Lines, 15 on a page.

Begins on fol. 46*a* of the MS. described under No. 5673.

Complete.

Similar to the above.

Beginning:

ओं नमो भगवते दत्तात्रेयाय सर्वदुष्टान्तकाय तपोबलपराक्रमाय.

End:

महाशक्तिमते ब्रह्मविष्णवीश्वररूपाय सहस्रदहन हुं फट् स्वाहा ॥

Colophon:

मालामन्त्रः ॥

No. **6398.** दत्तात्रेयमालामन्त्रः.

DATTĀTRĒYAMĀLĀMANTRAḤ.

Pages, 3. Lines, 4 on a page.

Begins on fol. 19*a* of the MS. described under No. 6387.

Complete.

This Mantra is supposed to make one wise and unattached to worldly life.

Beginning:

चिदानन्दगुरून् नत्वा मालामन्त्रं स(स्म)राम्यहम् ॥
ज्ञानवैराग्यसिद्ध्यर्थं दत्तात्रेयं नमाम्यहम् ॥

ओं नमो भगवते दत्तात्रेयाय स्मरणमात्रसन्तुष्टाय महाभयनिवारणाय महाज्ञानप्रदाय.

End:

सर्वमन्त्रस्वरूपाय सर्वयन्त्रस्वरूपाय सर्वतन्त्रस्वरूपाय सर्वफलस्वरूपाय सर्वयोगनिधे (धये) सर्वभोगनिधे(धये) सर्वसुखनिधे(धये) ओं नमो महासिद्धाय स्वाहा ॥

No. **6399.** दत्तात्रेयमालामन्त्रः.

DATTĀTRĒYAMĀLĀMANTRAḤ.

Page, 1. Lines, 9 on a page.

Begins on fol. 15*a* of the MS. described under No. 5868.

Complete.

A series of Mantras addressed to Dattātrēya.

Beginning :

ओं ऐं क्रां क्लीं क्लूं श्रीं ह्रूं ह्रीं ह्रूं सौः दत्तात्रेयाय नमः ।

End :

ओं श्रीं ह्रीं क्लीं दत्तात्रेयाय विष्णवे नमः ॥

No. **6400.** दत्तात्रेयवज्रकवचः.

DATTĀTRĒYAVAJRAKAVACAḤ.

Pages, 2. Lines, 19 on a page.

Begins on fol. 8*b* of the MS. described under No. 2886.

Complete as found in the fifth Paṭala of the Uḍḍāmarēśvara-tantra.

This is intended to protect one from all dangers.

Beginning :

दत्तात्रेयवज्रकवचमहामन्त्रस्य व्यासो भगवान् ऋषिः, अनुष्टुप् छन्दः, श्रीदत्तात्रेयपरमात्मा देवता ; द्रां बीजं, द्रीं शक्तिः, द्रूं कीलकं, श्रीदत्तात्रेयप्रीत्यर्थे मम आत्मरक्षणार्थे जपे विनियोगः ।

* * * *

भक्तप्रियो मुक्तिदाता जीवन्मुक्तिप्रदायकः ।
एवन्ध्यात्वानन्यचित्तो मद्वज्रकवचं जपेत् ॥
दत्तात्रेयः शिरः पातु सहस्राराब्जसंस्थितः ।
फालं पात्वानसूयेयश्चन्द्रमण्डलमध्यगः ॥

End :

यः पठेद्वज्रकवचं दत्तात्रेयसमो भवेत् ॥
एवं शिवेन कथितं हिमवत्सुता [य]यै
प्रोक्तं द(शि)लादमुनयेऽत्रिसुतेन पूर्वाच(र्वम्) ।
यः कोटिवज्रकवचं पठाति (तीह) दत्ता-
त्रेयोपमो योगी चिरायुश्च भविष्यति (भवति योगिसमश्चिरायुः)॥

Colophon:

इत्युड्डामेश्वरतन्त्रे उमामहेश्वरसंवादे अतिरहस्य[नाम]दत्तात्रेयवज्रकवचं नाम पञ्चमः पटलः ॥

No. **6401.** दत्तात्रेयवज्रकवचः.

DATTĀTRĒYAVAJRAKAVACAḤ.

Pages, 6. Lines, 9 on a page.

Begins on fol. 17*a* of the MS. described under No. 5868.

Complete.

Similar to the above.

The repetition of this Mantra is supposed to make one like Dattātrēya.

Beginning:

जटाजिनधरं देवं कोटिचन्द्रप्रकाशकम् ।
प्रत्यक्षं स्मरणान्नित्यं दत्तात्रेयं नमाम्यहम् ॥

ऋषय ऊचुः—

कथं सङ्कल्पसिद्धिस्स्याद्वेदव्यास महामुने ।

* * * *

दशा(शिला)दनमुनिः प्राह मया किमपि नोच्यते ।
ममास्ति वज्रकवचं गृहाणेत्यवदन्मुनिः ॥

* * * *

अस्य श्रीवज्रकवचस्तोत्रमन्त्रस्य भैरव ऋषिः,

दत्तात्रेयो महाख्यातः छन्दोऽनुष्टुप्प्रकीर्तितः ।
देवता(त्व)हमेवास्य द्रां बीजमिति कीर्तितम् ॥
आं शक्तिः कीलकं स्यादोमात्मा (तु)ह्रीं मनोर्मम ।

* * * *

दत्तात्रेयश्शिरः पातु सहस्राराब्जसंस्थितः ।
फालं पात्वानसूयश्च चन्द्रमण्डलमध्यगः ॥

End :

ऊर्ध्वं पातु महासिद्धः पात्वधस्ताज्जटाधरः ।
रक्षाहीनं तु मे स्थानं रक्षत्वादिमुनीश्वरः ॥
एतन्मे वज्रकवचं यः पठेच्छृणुयादपि ।
वज्रकायः चिरं जीवेत् दत्तात्रेयवर्म ब्रुवन् ॥

* * * *

इत्युवाच शिवो गौर्यै रहस्यं परमं शुभम् ।
यः पठेद्वज्रकवचं दत्तात्रेयसमो भवेत् ॥
एवं शिवेन कथितं हिमवत्सुतायै
प्रोक्तन्दशा(शिला)द[नन]मुनयेऽत्रिसुतेन पूर्वम् ।
यः कोऽपि वज्रकवचं पठतीह दत्ता—
त्रेयोपमश्चरति योगिसमश्चिरायुः ॥

Colophon :

इति दत्तात्रेयवज्रकवचं संपूर्णम् ॥

No. **6402.** दत्तात्रेयवज्रकवचः.
DATTĀTRĒYAVAJRAKAVACAḤ.

Pages, 12. Lines, 7 on a page.

Begins on fol. 15*a* of the MS. described under No. 5788.
Complete.

Similar to the above. Also supposed to have the power to enable one to accomplish one's desires.

Beginning :

अस्य श्रीदत्तात्रेय(वज्र)कवचस्तोत्रमन्त्रस्य शतरुद्र ऋषिः, देवी गायत्री छन्दः, श्रीदत्तात्रेयः परमात्मा देवता ; ओं बीजं, द्रां शक्तिः, द्रूं कीलकं, समस्तकार्यार्थे कवचमन्त्रपठने विनियोगः ।

* * * *

दत्तात्रेयश्शिरः पातु सहस्रांशुसमप्रभः ।
फालं पात्वानसूयेयश्चन्द्रमण्डलमध्यगः ॥

See under the previous number for the end.

No. **6403.** दत्तात्रेयवज्रकवचः.

DATTĀTRĒYAVAJRAKAVACAḤ.

Pages, 11. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 5445.

Complete.

Same as the above.

No. **6404.** दत्तात्रेयवश्यमन्त्रः.

DATTĀTRĒYAVAŚYAMANTRAḤ.

Page, 1. Lines, 9 on a page.

Begins on fol. 15*a* of the MS. described under No. 5868.

Complete.

This Mantra is supposed to win over people, so as to make them become favourably disposed towards one.

Beginning:

अस्य श्रीवश्यदत्तात्रेयमन्त्रस्य आत्रि ऋषिः, अनुष्टुप् छन्दः, श्रीदत्तात्रेयो देवता; आं बीजं, ह्रीं शक्तिः, क्रों कीलकं, श्रीदत्तात्रेयप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End:

एहि एहि आगच्छ आगच्छ मम सान्निध्यं कुरु कुरु मम मुखदर्शनसर्वजनवशीकर हं हं श्रीं क्लीं ह्रीं ओं अम्बिकादत्तात्रेयाय हुं फट् स्वाहा ॥

No. **6405.** दत्तात्रेयषडक्षरीमन्त्रराजमन्त्रः.

DATTĀTRĒYAṢAḌAKṢARĪMANTRARĀJAMANTRAḤ.

Page, 1. Lines, 7 on a page.

Begins on fol. 14*b* of the MS. described under No. 5788.

Complete.

This Mantra is supposed to have the power to remove one's sins and to increase one's wisdom and to enable one to accomplish one's desires.

It consists of 6 syllables.

Beginning:

गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ।
गुरुस्साक्षात्परं ब्रह्म तस्मै श्रीगुरवे नमः ॥

* * * *

प्राणानायम्य, अनन्तकोटिजन्माद्यवस्थापापनिवृत्त्यर्थमखण्डज्ञानसिद्ध्यर्थं मनोवाञ्छितफलसिद्ध्यर्थं दत्तात्रेयमुद्दिश्य दत्तात्रेयप्रीत्यर्थं दत्तात्रेयमन्त्रजपं करिष्ये—

अस्य श्रीदत्तात्रेयषडक्षरीमन्त्रराजमहामन्त्रस्य शबर ऋषिः, गायत्री छन्दः, श्रीदत्तात्रेयो देवता; ओं बीजं, श्रीं शक्तिः, क्लीं कीलकं, मम पश्यजनवशीकरणार्थे मानसाभीष्टसिद्ध्यर्थे जपे विनियोगः ।

End:

पञ्चपूजा । श्रीसद्गुरुचरणारविन्दाभ्यां नमः । श्रीदत्तात्रेयाय नमः ॥

No. **6406.** दत्तात्रेयषोडशाक्षरमन्त्रः.

DATTĀTRĒYAṢŌḌAŚĀKṢARAMANTRAḤ.

Page, 1. Lines, 19 on a page.

Begins on fol. 9*a* of the MS. described under No. 2886.

Complete.

This Mantra consists of 16 syllables and is supposed to be capable of removing one's poverty.

Beginning:

षोडशाक्षरी—

ओं ऐं क्लीं क्लूं ह्रां ह्रीं ह्रूं सः दत्तात्रेयाय नमः ।

End:

मन्दारमूले मणिपीठसंस्थं सुवर्णदामाध्वरबद्धदीक्षम् ।
ध्यायेत्पुनीतं(त्सुपूतं) नवनाथसिद्धं दारिद्र्यदावानलदेवमेघम् ॥

No. 6407. दत्तात्रेयषोडशाक्षरमन्त्रराजमहामन्त्रः.

DATTĀTRĒYAṢŌḌAŚĀKṢARAMANTRARĀJA-MAHĀMANTRAḤ.

Page, 1. Lines, 15 on a page.

Begins on fol. 46*a* of the MS. described under No. 5673.

Complete.

Similar to the above.

Beginning:

(दत्तात्रेय)षोडशाक्षरमन्त्रराजमहामन्त्रस्य शबररूपी शङ्कर ऋषिः, गायत्री छन्दः, श्रीदत्तात्रेयपरमात्मा देवता; द्रां बीजं, नमश्शक्तिः, दत्तात्रेयेति कीलकं, विनियोगः ।

End:

ओं ऐं क्लां क्लीं क्लूं ह्रां ह्रीं ह्रूं सौः दत्तात्रेयाय नमः । उत्तरन्यासः ॥

No. 6408. दत्तात्रेयस्तम्भनमन्त्रः.

DATTĀTRĒYASTAMBHANAMANTRAḤ.

Page, 1. Lines, 9 on a page.

Begins on fol. 14*b* of the MS. described under No. 5868.

Complete.

This Mantra is supposed to bewilder one's opposing disputants in a controversy and to make them mute and powerless to argue.

Beginning:

अस्य श्रीस्तम्भनदत्तात्रेयमन्त्रस्य भृगु ऋषिः, विराट् छन्दः, श्रीदत्तात्रेयो देवता; प्रां बीजं, ह्रूं शक्तिः, ठं कीलकं, मम श्रीदत्तात्रेयप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End:

सर्वेषां वादिनां सर्ववाक्चक्षुर्मुखमतिगतिं स्तम्भय सर्वजनं मे वश्यं कुरु कुरु दत्तदो दै हूं ह्रीं दं दं जं जं ठं ठं दत्तात्रेयाय हुं फट् स्वाहा ॥

No. 6409. दत्तात्रेयाष्टाक्षरीमन्त्रः.

DATTĀTRĒYĀṢṬĀKṢARĪMANTRAḤ.

Pages, 2. Lines, 4 on a page.

Begins on fol. 16*a* of the MS. described under No. 6387.

Complete.

This Mantra consists of 8 syllables, and its repetition is supposed to please Dattātrēya.

Beginning:

अस्य श्रीदत्तात्रेयाष्टाक्षरीमन्त्रस्य सदाशिव ऋषिः, अनुष्टुप् छन्दः, दत्तात्रेयभगवान् देवता, मम दत्तात्रेयप्रसादसिद्ध्यर्थे जपे विनियोगः, द्रां बीजं, द्रीं शक्तिः, द्रूं कीलकम् ।

End:

मन्त्रः—

ओं श्रीं ह्रीं [illegible] क्लौं द्रां एहि एहि दत्तात्रेयाय स्वाहा ॥

No. 6410. दत्तात्रेयैकाक्षरमन्त्रः.

DATTĀTRĒYAIKĀKṢARAMANTRAḤ.

Pages, 2. Lines, 15 on a page.

Begins on fol. 45*a* of the MS. described under No. 5673.

Complete.

Similar to the above.

This Mantra contains only one word, viz. द्रां, and ओं is not to be taken as forming part of the Mantra.

Beginning:

अस्य श्रीदत्तात्रेयैकाक्षरमहामन्त्रस्य शबररूपी शङ्कर ऋषिः, गायत्री छन्दः, श्रीदत्तात्रेयपरमात्मा देवता; द्रां बीजं, आं शक्तिः, क्रों कीलकं, मम श्रीदत्तात्रेयप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End:

पञ्चपूजा । मनुः—ओं द्रां । उत्तरन्यासः ॥

No. 6411. दत्तात्रेयोच्चाटनमन्त्रः.

DATTĀTREYŌCCĀṬANAMANTRAḤ.

Page, 1. Lines, 9 on a page.

Begins on fol. 14*b* of the MS described under No. 5868.

Complete.

This Mantra is supposed to enable one to drive off evil spirits and to destroy all evil agencies.

Beginning:

अस्य श्रीउच्चाटनदत्तात्रेयमन्त्रस्य परब्रह्म ऋषिः, गायत्री छन्दः, दत्तात्रेयो देवता; फं बीजं, बं शक्तिः, वुं कीलकं, श्रीदत्तात्रेयप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End:

हन शीघ्रं शीघ्रम् उच्चाटय उच्चाटय भ्रें भ्रें भ्रें फ्रें फ्रें फ्रें गच्छ गच्छ उच्चाटय उच्चाटय दत्तात्रेयाय फ्रें फ्रें बबद्ध विगच्छ विगच्छ कुरु कुरु स्वाहा ॥

No. 6412. दधिवामनमन्त्रः.

DADHIVĀMANAMANTRAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 11*a* of the MS. described under No. 5786.

Complete.

This Mantra is intended to please Viṣṇu conceived as food-giving Vāmana.

Beginning:

अस्य श्रीदधिवामनमन्त्रस्य ब्रह्मा ऋषिः, धृतिश्छन्दः, दधिवामनो देवता, दधिवामनप्रेरणया दधिवामनप्रीत्यर्थे जपे विनियोगः ।

End:

दधिवामनप्रेरणया दधिवामनप्रीत्यर्थं दधिवामनमहामन्त्रजपङ्करिष्ये—ओन्नमो भगवते श्रीविष्णवे अन्नाधिपतये स्वाहा ओं इति जपः । उपसंहारः पूर्ववत् ॥

No. 6413. दशवीरावलीमन्त्रः.

DAŚAVĪRĀVALĪMANTRAḤ.

Page, 1. Lines, 10 on a page.

Begins on fol. 231*b* of the MS. described under No. 124.

Complete.

This Mantra is intended to please the assemblage of ten Śākta-gurus.

Beginning:

अस्य श्रीदशवीरावलीमन्त्रस्य परमानन्दभैरव ऋषिः, गायत्री छन्दः, दशवीरावली देवता; ओं बीजं, ह्रीं शक्तिः, फट् कीलकं, दशवीरावलीप्र—गः ।

End:

ह्रीं श्रीं फट् फं फां फीं सृष्टिवीरभैरवदि—मः ।

* * * *

मार्तण्डवीरभैरवदि . . . मः । कालाग्निभैरवदि—मः ॥

No. 6414. दशश्लोकीमन्त्रः.

DAŚAŚLŌKĪMANTRAḤ.

Substance, palm-leaf. Size, 14 × 1¼ inches. Pages, 11. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 4*a*. The other works herein are Upamanyustōtra 1*a*, Mahānyāsa 9*b*, Saundaryalaharī 13*a*, Laghumātaṅgī-

mantra 37*a*, Śivapañcākṣarīmantra 38*a*, Mēdhādakṣiṇāmūrtimantra 39*a*, Mahāgaṇapatimantra 40*a*, Sūryanārāyaṇasaptāryāstōtra 40*b*, Bhuvanēśvarīstōtra 42*a*, Prāṇapratiṣṭhāmantra 46*a*, Mūrtipratiṣṭhāmantra 49*a*, Prāṇapratiṣṭākalpa 98*a*, Kalaśapūjāprakāra 106*a*, Śatarudrīyajapahōmārcanābhiṣēkanyāsavidhi 109*a*, Śivasahasranāmāvali 144*a*, Rudrahōma 162*a*.

Complete.

This Mantra contains a collection of ten Vēdic Ṛks, addressed to Sarasvatī, and is supposed to be able to bless one with learning.

Beginning:

ऋषय ऊचुः—

कथं सारस्वत[ः]प्राप्तिः केन ध्याये(ने)न सुव्रत ।
महासरस्वती येन तुष्टा भवति तद्वद ॥

आश्वलायन उवाच—

शृण्वन्तु ऋषयस्सर्वे गुह्याद्गुह्यतरं महत् ।
दशश्लोक्यमि(क्या इ)दं स्तोत्रं ध्यानपूर्वं वदाम्यहम् ॥

* * * *

अस्य श्रीदशश्लोकीस्तोत्रमन्त्रस्य आश्वलायन ऋषिः, अनुष्टुप् छन्दः, श्रीवागीश्वरी देवता; यद्वाग्वदन्तीति बीजं, देवीं वाचमजनयन्नि(न्ते)ति शक्तिः, प्र णो देवीति कीलकं, परब्रह्माधिदैवत्यं, मम सारस्वतप्रसादसिद्ध्यर्थे विनियोगः ।

* * * *

प्र णो देवीत्यस्य मन्त्रस्य भरद्वाज ऋषिः, अनुष्टुप् छन्दः, सरस्वती देवता, ओं बीजं, मम वाक्सिद्ध्यर्थे विनियोगः । प्र णो देवी सरस्वती . अवित्र्यवतु ।

End:

अम्बितमि(म इ)त्यस्य मन्त्रस्य आश्वलायन ऋषिः, अनुष्टुप् छन्दः, सरस्वती देवता . . . .

नामरूपात्मकं सर्वं यस्यामाविश्यतां मनः ।
ध्यायन्ती ब्रह्मरूपैका सा मां पातु सरस्वती ॥
यः कवित्वं निरातङ्कं भुक्तिं मुक्तिं च वाञ्छति ।
सोऽभ्यर्च्यैनां दशश्लोक्या भक्त्या स्तौति सरस्वतीम् ॥

* * * *

शरदिन्दुविकासमन्दहासां स्फुरदिन्दीवरलोचनाभिरामाम् ।
अरविन्दसमानसुन्दरास्यामरविन्दासनसुन्दरीमुपासे ॥
छन्दःपादयुगा निरुक्तसुनखा शिक्षा . . . ।

अस्मिन्नन्तर्गता दशश्लोकीमन्त्रा लिख्यन्ते—

(१) प्र णो देवी . . . . अविन्त्यवतु.
(२) आ नो दिवो बृहतः . . . . . उशती श्रृणोतु.
(३) पावका नस्सरस्वती . . . . . धियावसुः.
(४) चोदयित्री सूनृतानां . . . यज्ञं दधे सरस्वती.
(५) महो अर्णः . . . . विराजति.
(६) चत्वारि वाक् परिमिता . . . मनुष्या वदन्ति.
(७) यद्वाग्वदन्ति . . . . जगाम.
(८) देवीं वाचमजनयन्त . . . . . . सुष्टुतैतु.
(९) उत त्वः पश्यन् . . . . सुवासाः.
(१०) अम्बितमे . . . . नस्कृधि.

No. 6415. दाक्षायणीमन्त्रः.

DĀKṢĀYAṆĪMANTRAḤ.

Page, 1. Lines, 4 on a page.

Begins on fol. 5*a* of the MS. described under No. 6173. Complete.

This Mantra is addressed to Pārvatī, and is supposed to be able to destroy the effects of black magic.

Beginning:

ओं नमो भगवति दाक्षायणि कालिके सकलप्रयोगवेगान् संहर संहर दह दह पच पच शान्तिं कुरु कुरु.

End:

कुयोगसमये आं ह्रीं क्रों स्वाहा ॥
सहस्रं जपात् सिद्धिः ॥

No. 6416. दिक्पालाष्टकमन्त्रः.
DIKPĀLĀṢṬAKAMANTRAḤ.

Pages, 5. Lines, 6 on a page.

Begins on fol. 27*a* of the MS. described under No. 5786.

Complete

This Mantra is addressed to the eight dieties presiding over and protecting the eight quarters.

Beginning:

गुरुनमस्कारः । इन्द्राय नम इति प्राणायामः 12.
इं हृदयाय, द्रां शिरसे,. . . . .
श्रीइन्द्रप्रेरणया इन्द्रप्रीत्यर्थमिन्द्रमहामन्त्रजपङ्करिष्ये ।
ओं इन्द्राय नमः ओं । इति जप उपसंहारः पूर्ववत् ।

End:

गुरुनमस्कारः । ओं ईशानाय नम इति प्राणायामः 12.

* * * *

भूर्भुवस्सुवरोमिति दिग्बन्धः ।

* * * *

ईशानाय नम इति जपः । उपसंहारः पूर्ववत् ॥

No. 6417. दिगम्बरगोपालमन्त्रः.
DIGAMBARAGŌPĀLAMANTRAḤ.

Page, 1. Lines, 5 on a page.

Begins on fol. 55*b* of the MS. described under No. 5885.

Complete.

This Mantra is supposed to please Kṛṣṇa conceived as a naked young child.

Beginning:

अस्य श्रीदिगम्बरगोपालमन्त्रस्य नारद ऋषिः, अनुष्टुप् छन्दः, श्री दिगम्बरगोपालो देवता; क्लीं बीजं, स्वाहा शक्तिः, श्रीदिगम्बरगोपालप्रीत्यर्थे जपे विनियोगः ।

End:

मनुः—

क्लीं कृष्णाय जगन्मोहनविग्रहाय श्रीविष्णवे स्वाहा ॥

No. 6418. दिव्यरूपगोपालमन्त्रः.
DIVYARŪPAGŌPĀLAMANTRAḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 54*b* of the MS. described under No. 5885.

Complete.

Addressed to Kṛṣṇa conceived as a cow-herd of resplendent divine appearance.

Beginning:

अस्य श्रीदिव्यरूपगोपालमन्त्रस्य नारद ऋषिः, अनुष्टुप् छन्दः, दिव्यरूपगोपालो देवता; लिं बीजं, लिं शक्तिः, इं कीलकं, दिव्यरूपगोपालप्रीत्यर्थे जपे विनियोगः ।

End:

अं आं इं ईं उं ऊं एं ऐं ओं औं अं अः श्रीविष्णवे स्वाहाः ॥

No. 6419. दीपिनीमन्त्रः.
DĪPINĪMANTRAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 156*a* of the MS. described under No. 537.

Complete.

This Mantra is addressed to the goddess Śakti.

Beginning:

अथ दीपिनी

तारं लक्ष्मीं च वाग्बीजं मन्मथं भुवनेश्वरीम् ।
एतज्जप्त्वा ततः पश्चात् वाग्भवाख्यं समुच्चरेत् ॥
प्रणवं भुवनेशानि रमां कामं च वाग्भवम् ।
कामराजं ततो जप्त्वा त्रैलोक्यक्षोभकारकम् ॥

End:

कलसहह्रीं ओं ऐं क्लीं श्रीं ह्रीं कहलसं ह्रीं कहलसं ह्रीं कहयलसह्रीं कसकलह्रीं । ओं ह्रीं श्रीं हूं हं सः ऐं क्लीं सौः ऐं ह्रीं श्रीं ॥

No. **6420.** दुर्गाबीजैकाक्षरमन्त्रः.

DURGĀBĪJAIKĀKṢARAMANTRAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol 20*a* of the MS. described under No. 5786.

Complete.

This Mantra is addressed to Durgā conceived as Lakṣmī. It consists only of one syllable.

Beginning:

गुरुनमस्कारः । ओं दुः इति प्राणायामः 12. दां हृदयाय, दीं शिरसे, दूं शिखायै, दं कवचाय, दौं नेत्राभ्यां, दः अस्त्राय फट्, भूर्भुवः स्वरोमिति दिग्बन्धः ।

अस्य श्रीएकाक्षरदुर्गाबीजमन्त्रस्य कपिल ऋषिः, गायत्री छन्दः, दुर्गानामिका लक्ष्मीर्देवता, लक्ष्मीप्रेरणया लक्ष्मीप्रीत्यर्थे एकाक्षरदुर्गाबीजमन्त्रजपे विनियोगः ।

End:

एकाक्षरदुर्गाबीजमन्त्रजपं करिष्ये—ओं दुः ओं इति जपः। ७५५ हारः पूर्ववत् ॥

No. 6421. दुर्गामालामन्त्रः.
DURGĀMĀLĀMANTRAḤ.

Pages, 16. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 6025.

Complete.

This Mantra is addressed to Durgā, and is intended to counteract the effect of certain Mantras tending to disable the various organs of one's body.

Beginning:

ओं लं ह्रीं दुं दुर्गे नमो भगवति गजारूढे वज्रधारिणि श्मशानवासिनि ऊर्ध्वकेशि लम्बचिबुके सूक्ष्माङ्गे षोडशकलाभरणे नररुधिरमांसभक्षिणि महाचोरभयङ्करि ज्वल ज्वल ज्वालामालिनि ज्वल ज्वल शूलिनि उच्चाटनशूलिनि ।

End:

शिरोललाटभ्रूचक्षुश्श्रोत्रजिह्वाघ्राणकर्णमुखोष्ठदन्ततालुहनुग्रीवाबाहुस्कन्धगुदवक्षस्थलोरूदरजानुजङ्घापादाङ्गुलीषु अवयवेषु परकट्टच्छेदिनि शिरःकट्ट् खण्डय खण्डय मन्त्रकट्ट् मर्दय मर्दय सकलकट्ट् नाशय नाशय बन्धय बन्धय भ्रामय भ्रामय ओं ह्रीं रं ठं फट् स्वाहा ॥

